# महाभाष्यदिशा योगविभागसमीक्षा

(Mahābhāṣyadiśā Yogavibhāgasamīkṣā)

यादवपुरविश्वविद्यालयस्य संस्कृतविभागे **पि-एइच.डि. (Ph.D.)**
इत्युपाधिलाभाय समर्प्यमाणः शोधप्रबन्धसारः


<u>गवेषकः</u>

**बुलेट्-मण्डलः**
यावदपुरविश्वविद्यालयस्थसंस्कृतविभागीयः
पञ्जिकरणसंख्या – A00SA1401121

<u>मार्गदर्शकः</u>

**प्राध्यापकः ड. तपनशङ्करभट्टाचार्यः**
यावदपुरविश्वविद्यालयस्थसंस्कृतविभागीयः



संस्कृतविभागः
यादवपुरविश्वविद्यालयः
यादवपुरम्, कलिकाता, ७०००३२
२०२५

# प्रस्तावना

मानवाः शब्देनैव स्वमनोगतभावान् प्रकटयन्ति। तत्र विविधेषु स्थानेषु विविधाः भाषाः विद्यन्ते। भाषागतशब्दानां नियन्त्रणार्थं च विद्यन्ते नियमाः। शब्दानुशासनञ्च क्रियते व्याकरणद्वारा। तदुक्तं व्याक्रियन्ते शब्दा अनेन इति व्याकरणम्। लौकिकशब्दानां तथा वैदिकशब्दानाम् अनुशासनार्थं भगवता पाणिनिना अष्टाध्यायी इत्याख्यः ग्रन्थः रचितः। कालप्रवाहात् भाषागतशब्दानां मध्ये परिवर्तनं जायते। नूतनशब्दानामपि व्यवहारः दृश्यते। पाणिनिना सूत्रं रचितम्। तदनन्तरं कात्यायनेन वार्त्तिकं रचितम्। तदनन्तरं पतञ्जलिः महाभाष्यं रचितवान्। 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति महाभाष्यवचनानुसारं व्याकरणस्य मुख्यप्रयोजनेषु अन्यतमं हि लाघवम्। सर्वेषु पाणिनीयव्याकरणेतरव्याकरणशास्त्रेषु लाघवसाधकाः केचन उपायाः दृश्यन्ते। पाणिनीयव्याकरणेऽपि संक्षेपेण पदसिद्धिनिमित्तं बहवः उपायाः स्वीकृताः। तेषु उपायेषु अन्यतमो हि योगविभागरूपोपायः। येषां शब्दानां सिद्धिप्रक्रिया पाणिनीयसूत्रेण न सिद्ध्यति तेषां शब्दानां सिद्ध्यर्थं योगविभागाद्युपायाः आश्रियन्ते। योगविभागाद् इष्टसिद्धिः इत्येका परिभाषा अस्ति। तेन इष्टस्य शब्दस्य साधुत्वप्रतिपादनार्थमेव योगविभागः स्वीक्रियते न त्वनिष्टस्य सिद्धये। महाभाष्यकारेण भगवता पतञ्जलिना बहुत्र सूत्रेषु योगविभागः स्वीकृतः। योगविभागज्ञानं विना व्याकरणशास्त्रे परा गतिः नैव सिद्ध्यति। यद्यपि तत्र तत्र प्रसङ्गेषु योगविभागविषये आचार्यैः उक्तं तथापि

महाभाष्यान्तर्गतानां योगविभागानामेकत्र विस्तरेण समीक्षा नैव कृता। अतः विषयोऽयं मम अस्य शोधप्रबन्धस्य विषयत्वेन स्वीकृतः। इतः पूर्वं किशोरचन्द्रपाढीमहोदयेन पाणिनीयव्याकरणे योगविभागविमर्शः इति नामकः लघुग्रन्थः चरितः। तस्मिन् ग्रन्थे महाभाष्यकारोक्तयोगविभागाः प्रसङ्गप्राप्त्या संक्षेपेण उल्लिखिताः। मया त्वत्र शोधप्रबन्धे महाभाष्यकारस्वीकृतयोगविभागानां सविमर्शं विशद्विवरणं विहितमिति न पिष्टपेषणशङ्कावसर इति विशेषः। तत्र प्रत्येकं योगविभागस्य पर्यालोचनायाम् आदौ आक्षेपः उत्थापितः, ततः योगविभागेन आक्षेपस्य समाधानं प्रतिपादितम्। ततः परं योगविभागस्य आवश्यकता अस्ति न वेति समीक्षितम्। शास्त्रीयसिद्धान्तविषये विदुषां मतपार्थक्यं भवति एव, तत्रापि पुनः वैयाकरणसिद्धान्तविषये। अन्ते च काशिकाकारादीनां मतमपि आलोचितम्। तेन योगविभागविषये आचार्याणां मतज्ञानपुरस्सरं स्पष्टप्रतिपत्तिः भविष्यति। 'महाभाष्यदिशा योगविभागसमीक्षा' इति शीर्षकोपेतः उपोद्घातोपसंहारविशिष्टः मम शोधप्रबन्धः पञ्चभिः अध्यायैः विभक्तः। अत्र वस्तुतः अष्टाध्यायीग्रन्थे ये मुख्याः अधिकाराः सन्ति ते अधिकाराः एव शोधप्रबन्धस्यास्य अध्यायनाम्नः आधारभूताः। तत्र उपोद्घातभागे शोधप्रबन्धस्य पूर्वपीठिका रचिता। अत्र व्याकरणसम्प्रदायानां सामान्यपरिचयः, पाणिनीयव्याकरणस्य परिचयः, त्रिमुनीनां सामान्यपरिचयः, महाभाष्यग्रन्थस्य परिचयः, सूत्रक्रमः प्रक्रियाक्रमः इत्येते केचन विषयाः संक्षेपेण आलोचिताः। 'पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः'

इत्यभिधेये प्रथमे अध्याये आदौ पदसिद्ध्यर्थमाश्रिताः योगविभागभिन्नाः संज्ञाकरणादयः अष्ट मुख्या उपायाः वर्णिताः। अन्ते च योगविभागरूपः उपायः विस्तरेण वर्णितः। 'समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा' इति नामके द्वितीये अध्याये समासाधिकारस्थानां त्रयाणां सूत्राणां योगविभागः समीक्षितः। ततः प्रत्ययाधिकारस्थानां त्रयोदशसूत्राणां योगविभागः आलोचितः। तत्र प्रत्येकं सूत्राणां योगविभागालोचनावसरे आदौ आक्षेपः कृतः, तदनन्तरं योगविभागेन समाधानं कृतम्। अन्ते च समीक्षा कृता। 'अङ्गाधिकारस्थानां योगविभागानां समीक्षा' इति नामके तृतीये अध्याये अष्टादशसूत्राणां योगविभागाः आलोचिताः। 'पदाधिकारस्थानां योगविभागानां समीक्षा' इत्यभिधेये चतुर्थे अध्याये सप्तसूत्राणां योगविभागः आलोचितः। 'अवशिष्टानां योगविभागानां समीक्षा' इत्यस्ति पञ्चमोऽध्यायः। अवशिष्टात्मकेऽस्मिन् अध्याये ते एव योगविभागाः आलोचिताः ये पूर्वेषु अध्यायेषु नान्तर्भूताः। एकादशसूत्राणां योगविभागः अत्र समीक्षितः। एवञ्च मम शोधप्रबन्धेऽस्मिन् आहत्य द्विपञ्चाशत् योगविभागाः आलोचिताः। एतावता पञ्चसु अध्यायेषु आलोचिताः विषयाः उपसंहारे संक्षेपेण वर्णिताः। शोधप्रबन्धस्य अन्ते एका परिशीलितग्रन्थपञ्जी प्रदत्ता।

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।
वचो विन्यासवैचित्र्यमात्रमत्र विचार्यताम्॥

‘एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति’ इति भाष्यवचनं मनसि निधाय व्याकरणशास्त्रस्य अध्ययनाध्यापने अयं शोधप्रबन्धः सहायको भवतु इति वाग्देव्याः स्वीकृतिः नितरां प्रार्थिता। एवञ्च अत्यल्पमतिना मया शोधपत्रमिदं विरचितम्। एतच्च कियत्साफल्यमेति तत्र विद्वांसः एव प्रमाणमिति शिवम्।

# महाभाष्यदिशा योगविभागसमीक्षा

## उपोद्घातः

'महाभाष्यदिशा योगविभागसमीक्षा' इति शीर्षकोपेतः उपोद्घातोपसंहारविशिष्टोऽयं मम शोधप्रबन्धः पञ्चभिः अध्यायैः विभक्तः। अत्र वस्तुतः अष्टाध्यायीग्रन्थे ये मुख्याः अधिकाराः सन्ति ते अधिकाराः एव शोधप्रबन्धस्यास्य अध्यायनाम्नः आधारभूताः। उपोद्घातभागे शोधप्रबन्धस्य पूर्वपीठिका रचिता। अत्र शोधप्रबन्धोपयोगिनः केचन मुख्याः विषयाः संक्षेपेण आलोचिताः।

## व्याकरणसम्प्रदायानां सामान्यपरिचयः

व्याकरणवाङ्मये ऐन्द्रं व्याकरणं प्राचीनतममित्यत्र तु नास्ति मतपार्थक्यम्। तदनन्तरं नैके वैयाकरणाः व्याकरणशास्त्रं चरितवन्तः। अतः नैके व्याकरणसम्प्रदायाः सञ्जाताः। इन्द्रादारभ्य अद्य प्रभृति आहत्य कति वैयाकरणाः अभवन् इति तु निश्चयरूपेण वक्तुं नैव शक्यते। पाणिनिना अष्टाध्यायीग्रन्थे दशवैयाकरणानां नामनिर्देशपूर्वकोल्लेखः कृतः। एतान् अतिरिच्य अपि बहूनां वैयाकरणानां नामानि प्राचीनग्रन्थेषु प्राप्यन्ते। आधुनिकवैयाकरणैः अष्टौ व्याकरणसम्प्रदायाः मुख्यतया स्वीक्रियन्ते। तदुक्तं बोपदेवेने स्वकीये कविकल्पद्रुमाख्ये ग्रन्थे –

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।

पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥ इति।

इन्द्रः, चन्द्रः, काशकृत्स्नः, आपिशलिः, शाकटायनः, पाणिनिः, अमरः, जैनेन्द्रः इत्येते अष्टौ वैयाकरणाः स्वस्वसम्प्रदायस्य प्रवर्तकाः। एमष्टौ व्याकरणसम्प्रदायाः प्रसिद्धाः सन्ति।

**पाणिनीयव्याकरणस्य सामान्यपरिचयः**

अष्टौ व्याकरणसम्प्रदायेषु पाणिनिसम्प्रदायः अन्यतमः। भगवता पाणिनिना अष्टाध्यायीनामको ग्रन्थः रचितः। ग्रन्थेऽस्मिन् अष्टौ अध्यायाः सन्ति। प्रति अध्यायं चत्वारः पादाः सन्ति। प्रति पादं सूत्राणि सन्ति। तत्र प्रथमाध्यायद्वये पदानां भेदाः, वाक्ये पदानां परस्परसम्बन्धाश्च आलोचिताः सन्ति। तृतीयाध्याये तिङन्तशब्दानां प्रकृतिप्रत्ययविभागः दृश्यते। चतुर्थाध्याये तथा पञ्चमाध्याये सुबन्तशब्दानां प्रकृतिप्रत्ययविभागः दृश्यते। षष्ठाध्याये तथा सप्तमाध्याये आगमादेशादिद्वारा शब्दानां निष्पत्तिप्रक्रिया वर्णिता अस्ति। अष्टमाध्याये सन्धिविषये स्वरविषये च चर्चा दृश्यते। पाणिनिकृतसूत्राणामर्थं विशदीकर्तुं कात्यायनमुनिः वार्त्तिकानि रचितवान्। पाणिनिमुनिना उक्तस्य अनुक्तस्य दुरुक्तस्य च चिन्ता तेषु वार्त्तिकेषु वर्तते। कालप्रवाहेण पाणिनीयव्याकरणे बहुषु स्थलेषु अनेके पूर्वपक्षाः समुत्पन्नाः। तेषां पूर्वपक्षाणां समाधानाय भगवान् पतञ्जलिः महाभाष्यं रचितवान्। महाभाष्ये पतञ्जलिना पाणिनीयसूत्राणां कात्यायनकृतवार्त्तिकानाञ्च व्याख्या कृता। महाभाष्ये विषयप्रतिपादनशैली अत्यन्तं

सरला किन्तु विषयः अतीव गभीरः अस्ति। पाणिनिः कात्यायनः पतञ्जलिः इति मुनित्रयम्। मुनित्रयस्य प्रयत्नेन समृद्धं व्याकरणमेव त्रिमुनिव्याकरणमिति प्रथितम्।

**पाणिनिः**

पाणिनिमुनिः कस्मिन् कालखण्डे जनिमलभत इति विषये विद्वज्जनेषु नास्ति मतैक्यम्। २८०० ईसपूर्वाब्दतः ५०० ईसपूर्वाब्दपर्यन्तं यः कालखण्डः तस्मिन्नेव कालखण्डे पाणिनेः जन्म अभवदिति वयं स्वीकर्तुं शक्नुमः।[१] अष्टाध्यायीग्रन्थे वैदिकशब्दानामपि शासनं क्रियते। तेन ज्ञायते यत् तदा वैदिकभाषाया अपि प्रचारः आसीत्। वस्तुतः तदा संस्कृतभाषा एव सामाजिकव्यवहारस्य प्रधानीभूता भाषा आसीदिति पाणिनेः अष्टाध्यायीग्रन्थादेव ज्ञायते। संस्कृतभाषया एव जनाः तेषां व्यवहारं सम्पादयन्ति स्म। संस्कृतभाषायाः व्यवहारः गौतमबुद्धस्य प्रागेव आसीत्। यतो हि गौतमबुद्धस्य समये संस्कृतस्य एतादृशः प्रचारः नासीत्। पाणिनेः जन्मस्थानं पश्चिमभारतस्य शलातुर इति ग्राम आसीत्। अतः शालातुरीयः इत्यपि पाणिनेः नाम अस्ति। पाणिनेः गुरोः नाम उपवर्ष आसीत्। पितुः नाम पणिनः, मातुः नाम दाक्षी इति आसीत्। पाणिनेः प्राक् नैके वैयाकरणाः आसन्। तेषां ग्रन्थान् परिभाव्य, तेषां मतभेदं परिशील्य च अष्टाध्यायीनामकं ग्रन्थं विरचितवान्।

**कात्यायनः**

पाणिनिः तदानीन्तनकाले विद्यमानान् संस्कृतशब्दान् सम्यक् परिशील्य सूत्रं विरचितवान्। पाणिनेः समये संस्कृतभाषा एव व्यावहारिकी भाषा आसीत्। कालप्रवाहेण केषाञ्चित् शब्दानां रूपे परिवर्तनं परिलक्ष्यते। केषाञ्चित् नूतनशब्दानाञ्च व्यवहारः दृश्यते। तेषां शब्दानाम् अनुशासनार्थं पाणिनिना नियमः नैव कृतः। किञ्च पाणिनिः पश्चिमभारतीयः, कात्यायनः दक्षिणभारतीयः आसीत्। तेन स्थानभेदात् शब्दानां प्रायोगिकभेदः स्वाभाविकः आसीत्। अतः पाणिनीयसूत्रान् अवलम्ब्य समीक्षात्मकरूपेण परिशिष्टात्मकरूपेण वा आचार्येण कात्यायनेन वार्त्तिकानि विरचितानि। तदुक्तं पाराशरोपपुराणे –

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्त्तिकं प्राहुः वार्त्तिकज्ञा मनीषिणः॥[२] इति।

अर्थात् यत्र उक्तानुक्तदुरुक्तानां चर्चा क्रियते तदेव वार्त्तिकमिति उच्यते वार्त्तिकज्ञैः इत्यर्थः। कात्यायनरचितवार्त्तिकानि प्रायः १४०० सन्ति। परन्तु न कश्चित् पृथक् ग्रन्थः उपलभ्यते यत्र एतानि वार्त्तिकानि उपलभ्यन्ते। अपि तु भगवता पतञ्जलिना महाभाष्ये एतानि वार्त्तिकानि सप्रसङ्गं उद्धृतानि।

**पतञ्जलिः**

महर्षिपतञ्जलिः पाणिनीयव्याकरणस्य प्रामाणिकः आचार्यः अस्ति। पतञ्जलेः समयोऽपि विवादग्रस्तोऽस्ति। पाश्चात्यविद्वांसः अस्य समयः १५० ईसपूर्वाब्दः इति

स्वीकुर्वन्ति। युधिष्ठिरमीमांसकेन पाश्चात्यविदूषां मतं निरस्य १००० ईसपूर्वाब्दः स्वीकृतः।[३] एतत्तु निश्चितं यत् पाणिनेः बहुवर्षेभ्यः परं कात्यायनः आसीत्। कात्यायनमुनेः बहुवर्षेभ्यः परं पतञ्जलिः आसीत्। पतञ्जलेः जन्मस्थानं कश्मीरप्रदेशः आसीदिति युधिष्ठिरमीमांसकेन स्वीकृतः।[४] बलदेव-उपाध्यायः पतञ्जलेः जन्मस्थानं काशी इति स्वीकृतवान्। पतञ्जलेः समये पाणिनेः नियमाः यथा प्रचलिताः आसन् तथैव अपाणिनीयाः अपि शब्दाः व्यवह्रियन्ते स्म। एतादृशशब्दानां साधुत्वप्रतिपादनाय पतञ्जलिना इष्टयः आश्रिताः।

**महाभाष्यस्य परिचयः**

विभिन्नशास्त्राणां व्याख्याग्रन्थाः भाष्यशब्देन व्यवह्रियन्ते। भाष्यग्रन्थस्य स्वरूपमुक्तं –

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥[५] इति।

परन्तु पतञ्जलिना विरचितं भाष्यं महाभाष्यमिति कथ्यते। अत्र कारणं हि भाष्यस्यास्य माहात्म्यम्। अपरमेकं कारणं हि पतञ्जलेः पूर्वमपि बहवः भाष्यग्रन्थाः विद्यमानाः आसन्, प्रायः तेभ्यः अस्य भेदप्रदर्शनार्थं महाभाष्यमिति उच्यते। पाणिनेः अष्टाध्यायीग्रन्थस्थसूत्राणां कात्यायनविरचितवार्त्तिकानाञ्च व्याख्या महर्षिणा पतञ्जलिना महाभाष्यग्रन्थे कृता। सूत्रविचारकाले तत्र तत्र सन्दर्भे व्याकरणस्य शब्दनित्यत्ववादः, स्फोटवादः इत्यादीनां दार्शनिकतत्त्वानामपि

विचारः दृश्यते। भर्तृहरिणा स्वकीये वाक्यपदीयग्रन्थे एतानि दार्शनिकतत्त्वानि विस्तरेण प्रतिपादितानि। अत एवोक्तं भर्तृहरिणा –

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने॥[६] इति।

महाभाष्ये ८५ आह्निकानि विद्यन्ते। अह्ना निवृत्तम् आह्निकम् इति व्युत्पत्त्या एकस्मिन् दिवसे चर्चितः विषयः यत्र संगृहीतः तद् आह्निकमिति उच्यते। बहुभिः विद्वज्जनैः महाभाष्यस्य व्याख्या कृता। ज्येष्ठकलशः, मैत्रेयरक्षितः, पुरुषोत्तमदेवः, धनेश्वरः, शेषनारायणः, विष्णुमित्रः, नीलकण्ठः, शेषविष्णुः, शिवरामेन्द्रसरस्वती, प्रयागवेङ्कटाद्रिः, तिरुमलयज्वा, कुमारतातयः, राजन्सिहः, नारायणः, सर्वेश्वरदीक्षितः, गोपालकृष्णशास्त्री इत्येते विद्वांसः महाभाष्यस्य संस्कृतव्याख्यां कृतवन्तः। भर्तृहरेः महाभाष्यदीपिकाख्या व्याख्या उपलभ्यमानासु व्याख्यासु प्राचीनतमा। कैय्यटकृता प्रदीपव्याख्या, भट्टोजिदीक्षितकृता शब्दकौस्तुभव्याख्या च अपि प्रसिद्धा। कैय्यटस्य प्रदीपव्याख्यामवलम्ब्य नागेशेन उद्योतनामिका व्याख्या कृता। एवम् उपोद्घातभागे व्याकरणसम्प्रदायानां सामान्यपरिचयः, पाणिनीयव्याकरणस्य परिचयः, त्रिमुनीनां परिचयः, महाभाष्यग्रन्थस्य सामान्यपरिचयः, सूत्रक्रमः, प्रक्रियाक्रमः इत्येते केचन विषयाः सक्षेपेण आलोचिताः।

आचार्येण पाणिनिना षड्विधसूत्राणि रचितानि। किञ्च पदसिद्ध्यर्थं नैके उपायाः आश्रिताः। तेषु उपायेषु अन्यतमः अस्ति योगविभागः। 'महाभाष्यदिशा योगविभागसमीक्षा' इति शीर्षकोपेतः उपोद्घातोपसंहारविशिष्टः मम शोधप्रबन्धः पञ्चभिः अध्यायैः विभक्तः। अत्र वस्तुतः अष्टाध्यायीग्रन्थे ये मुख्याः अधिकाराः सन्ति ते अधिकाराः एव शोधप्रबन्धस्यास्य अध्यायनाम्नः आधारभूताः। अस्मिन् उपोद्घातभागे शोधप्रबन्धस्य पूर्वपीठिका रचिता। अत्र व्याकरणसम्प्रदायानां सामान्यपरिचयः, पाणिनीयव्याकरणस्य परिचयः, त्रिमुनीनां सामान्यपरिचयः, महाभाष्यग्रन्थस्य परिचयः, सूत्रक्रमः, प्रक्रियाक्रमः, सूत्राणां भेदाः इत्येते केचन विषयाः संक्षेपेण आलोचिताः। 'पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः' इत्यभिधेये प्रथमे अध्याये आदौ पदसिद्ध्यर्थमाश्रिताः योगविभागभिन्नाः संज्ञाकरणादयः अष्ट मुख्या उपायाः वर्णिताः। अन्ते च योगविभागरूपः उपायः विस्तरेण वर्णितः। 'समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा' इति नामके द्वितीये अध्याये समासाधिकारस्थानां त्रयाणां सूत्राणां योगविभागः समीक्षितः। ततः प्रत्ययाधिकारस्थानां त्रयोदशसूत्राणां योगविभागः आलोचितः। तत्र प्रत्येकं सूत्राणां योगविभागालोचनावसरे आदौ आक्षेपः कृतः, तदनन्तरं योगविभागेन समाधानं कृतम्। अन्ते च समीक्षा कृता। 'अङ्गाधिकारस्थानां योगविभागानां समीक्षा' इति नामके तृतीये अध्याये अष्टादशसूत्राणां योगविभागाः आलोचिताः।

‘पदाधिकारस्थानां योगविभागानां समीक्षा’ इत्यभिधेये चतुर्थे अध्याये सप्तसूत्राणां योगविभागः आलोचितः। ‘अवशिष्टानां योगविभागानां समीक्षा’ इत्यस्ति पञ्चमोऽध्यायः। अवशिष्टात्मकेऽस्मिन् अध्याये ते एव योगविभागाः आलोचिताः ये पूर्वेषु अध्यायेषु नान्तर्भूताः। एकादशसूत्राणां योगविभागः अत्र समीक्षितः। एवञ्च मम शोधप्रबन्धेऽस्मिन् आहत्य द्विपञ्चाशत् योगविभागाः आलोचिताः। एतावता पञ्चसु अध्यायेषु आलोचिताः विषयाः उपसंहारे संक्षेपेण वर्णिताः। अन्ते च एका परिशीलितग्रन्थपञ्जी प्रदत्ता।

मम शोधप्रबन्धे निर्दिष्टा काचित् शोधपद्धतिः अवलम्बिता। शोधप्रबन्धस्य शीर्षकचयनादनन्तरं शोधप्रबन्धोपयोगितथ्यसंग्रहः कृतः। अतः शोधप्रबन्धस्यास्य प्राथमिकपर्याये संग्रहात्मिका शोधपद्धतिः अङ्गीकृता। योगविभागालोचनावसरे विश्लेषणात्मिका तुलनात्मिका च शोधपद्धतिः अनुसृता। अयं शोधप्रबन्धः सरलसंस्कृतभाषया देवनागरीलिप्या ‘Sanskrit 2003’ इति सङ्गणकीयफण्ट्-सहायेन निबद्धः। सर्वेषाम् अनायासेन बोधाय मार्गनिर्देशकस्य अनुमतिमादाय सरला परिशीलितग्रन्थपञ्जीशैली चाङ्गीकृता।

**प्रथमोऽध्यायः – पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषु उपायेषु योगविभागः**

आचार्येण पाणिनिना षड्विधसूत्राणि रचितानि। किञ्च पदसिद्ध्यर्थं नैके उपायाः आश्रिताः। तेषु उपायेषु अन्यतमः अस्ति योगविभागः। ‘पाणिनीयव्याकरणे

पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः' इति नामधेये प्रथमे अध्याये आदौ पदसिद्ध्यर्थमाश्रिताः योगविभागभिन्नाः अष्ट मुख्या उपायाः वर्णिताः। अन्ते च योगविभागरूपोपायः विस्तरेण आलोचितः।

**संज्ञाकरणम्**

व्याकरणशास्त्रस्य मुख्यप्रयोजनेषु अन्यतमं भवति लाघवम्। संज्ञाशब्दं विना व्याकरणशास्त्रे लघुभूतोपायेन कार्यविधानं प्रायः असम्भवम्। पाणिनीयव्याकरणेऽपि बहुविधाः संज्ञाः दृश्यन्ते। तत्र आदौ संज्ञाः द्विविधाः भवन्ति। यथा – कृत्रिमसंज्ञा, अकृत्रिमसंज्ञा चेति। तत्र याः संज्ञाः पाणिनिना कृताः ताः कृत्रिमसंज्ञाः इति उच्यन्ते। उदाहरणं यथा – घु-टि-भ्वादयः कृत्रिमाः संज्ञाः। याश्च संज्ञाः पाणिनिना न कृताः अपि तु पाणिनेः प्रागपि पूर्वाचार्यैः व्यवहृताः ताः अकृत्रिमाः संज्ञाः इति उच्यन्ते। उदाहरणं यथा – गुण-वृद्धि-सवर्ण-प्रातिपदिकादयः संज्ञाः अकृत्रिमाः संज्ञाः। पुनश्च संज्ञायाः शब्दगतगौरवलाघवानुसारं संज्ञा द्विविधा भवति – लघ्वीसंज्ञा महतीसंज्ञा चेति। तत्र अल्पाक्षरविशिष्टा संज्ञा भवति लघ्वीसंज्ञा। उदाहरणं यथा – टिसंज्ञा, घिसंज्ञा इत्यादयः संज्ञाः। याः संज्ञाः अधिकाक्षरविशिष्टाः भवन्ति ताः संज्ञाः महतीसंज्ञाः उच्यन्ते। उदाहरणं यथा – प्रातिपदिकसंज्ञा, सर्वनामसंज्ञा इत्यादयः महतीसंज्ञाः। अत्र प्रश्नः उदेति यत् संज्ञा तु लघ्वर्थं क्रियते तर्हि अधिकाक्षरविशिष्टा महतीसंज्ञा किमर्थं क्रियते। अत्र उच्यते अन्वर्थसंज्ञाविधानार्थं महती संज्ञा क्रियते। तदुक्तं

महाभाष्यकारेण – 'तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम्। अन्वर्थसंज्ञा यथा विज्ञायेत। सर्वादीनि सर्वनामसंज्ञानि भवन्ति। सर्वेषां नामानीति चातः सर्वनामानि'[७] इति। अर्थात् संज्ञाभूतशब्दस्य व्युत्पत्तिगतार्थेनापि संज्ञा दृढा भवति। एवञ्च कदाचित् विशेषकार्यसिद्ध्यर्थम् आचार्यैः महतीसंज्ञा क्रियते।

**अनुबन्धकरणम्**

पाणिनीयव्याकरणे अनुबन्धकरणं पाणिनेः सूक्ष्मेक्षिकायाः द्योतकमस्ति। कार्यविशेषसम्पादनार्थमेव अनुबन्धग्रहणं कृतम् आचार्येण पाणिनिना। ते एव वर्णाः अत्र अनुबन्धशब्देन उच्यन्ते ये वर्णाः प्रकृतिप्रत्ययादेशागमादिभिः सह युज्यन्ते तथा अनन्तरं येषां लोपः विधीयते। पाणिनीयव्याकरणे प्रवृत्त्यर्थं प्रत्याहारस्य ज्ञानमावश्यकम्। प्रत्याहारसिद्ध्यर्थञ्च अनुबन्धवर्णानाम् अर्थात् इत्संज्ञकवर्णानाम् आवश्यकता अस्ति। तदुक्तं महाभाष्यकारेण – 'अनुबन्धकरणार्थश्च वर्णानामुपदेशः कर्तव्यः। अनुबन्धानासङ्क्ष्यामीति। न ह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम्। स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च। वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम्। प्रत्याहारो वृत्त्यर्थः'[८] इति।

पाणिनिना अनुबन्धस्य लक्षणं न कृतम्। परन्तु व्याकरणशास्त्रे 'इत्संज्ञकत्वमनुबन्धत्वम्। इत्संज्ञायोग्यत्वमनुबन्धत्वम्।' इति स्वीक्रियते। अर्थात् इत्संज्ञकवर्णाः तथा इत्संज्ञायोग्यवर्णाः अनुबन्धशब्देनोच्यन्ते इत्यर्थः। 'उपदेशेऽजनुनासिक इत्' (पा.सू. १.३.२) इत्यादिभिः सप्तभिः सूत्रैः

उपदेशावस्थायां वर्णानाम् इत् इति संज्ञा विधीयते। 'तस्य लोपः' (पा.सू. १.३.९) इति सूत्रेण इत्संज्ञकवर्णानां लोपः विधीयते। यतो हि अनुबन्धाः निमित्तरूपेण कार्यं कुर्वन्ति। अर्थात् शब्दनिष्पत्तिप्रक्रियायाम् अनुबन्धाः एव कार्यस्य निमित्तकारणरूपेण तिष्ठन्ति। तेन अनुबन्धानुसारेणैव कार्याणि भवन्ति। स्वरवर्णाः, व्यञ्जनवर्णाः उभयविधवर्णाः अपि अनुबन्धरूपेण स्वीकृताः। अष्टाध्याय्याः सर्वस्मिन् प्रकरणे अनुबन्धस्य प्रयोगः दृश्यते। वस्तुतः अनुबन्धकरणं विना व्याकरणस्य शब्दनिष्पत्तिप्रक्रिया नैव सम्भवति। यतो हि अनुबन्धद्वारा व्याकरणस्य नैकानि प्रयोजनानि सिध्यन्ति। अनुबन्धमाध्यमेनैव समानस्वरूपविशिष्टप्रत्ययाः भिन्नं भिन्नम् अर्थं बोधयति। यथा कृत्प्रत्ययप्रकरणे यत्प्रत्ययः तथा ण्यत्प्रत्ययः अनुबन्धलोपानन्तरं समानस्वरूपविशिष्टः अस्ति। यतो अनुबन्धलोपात् परम् उभयोः स्वरूपं 'य' इत्येव भवति। परन्तु अनुबन्धभिन्नत्वात् भिन्नं भिन्नं रूपं निष्पद्यते। गुणवृद्धिविधानं, गुणवृद्धिनिषेधः, सम्प्रसारणविधानम्, अनुनासिकविधानं, लोपविधानम्, आदेशविधानम्, आगमविधानं, विकरणविधानं, स्वरादिविधानम् इत्यादिकार्यविधानार्थम् अनुबन्धाः प्रयुज्यन्ते। पाणिनीयव्याकरणस्य लाघवसाधकतत्त्वेषु अन्यतमम् अस्ति अनुबन्धकरणम्। वैयाकरणैः न केवलं लघ्वर्थम् अनुबन्धग्रहणं कृतम्, अपि तु भाषायाः वैज्ञानिकी व्यवस्था अनायासेन प्रतिपादनार्थञ्च अनुबन्धानां ग्रहणं कृतम्।

**स्थान्यादेशभावः**

यः विधीयते सः आदेशः। यस्य स्थाने आदेशः विधीयते सः स्थानी। पाणिनीयव्याकरणशास्त्रे शब्दानुशासनार्थम् आश्रितेषु उपायेषु अयं स्थान्यादेशभावरूपः उपायः अन्यतमः। अस्य उदाहरणं यथा – चतुर्थ्येकवचनस्य 'ङे' इति एकेनैव प्रत्ययेन रामाय, सर्वस्मै, सर्वस्यै, जगते, मालायै, इत्यादीनि रूपाणि सिध्यन्ति। तथाहि – 'ङ्याप्प्रातिपदिकात्' (पा.सू. ४.१.१) इत्यधिकारस्थेन 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाङ्ङ्योस्सुप्' (पा.सू. ४.१.२) इत्यनेन सूत्रेण प्रातिपदिकाद् एकविंशतिस्वादिप्रत्ययानां विधानं क्रियते। परन्तु प्रयोगावस्थायाम् एतेषां प्रत्ययानां नैकानि रूपाणि दृश्यन्ते। यथा – चतुर्थ्येकवचनस्य प्रत्ययः भवति 'ङे' इति। परन्तु प्रयोगावस्थायां रामाय, सर्वस्मै, सर्वस्यै, ज्ञानिने, वाचे, जगते, मालायै, नद्यै, कवये, भानवे, तुभ्यम्, मह्यम्, इत्येवं नैकानि रूपाणि दृश्यन्ते। अत्र प्रश्नः भवति यत् एकस्यैव ङे इति प्रत्ययस्य य, स्मै इत्यादीनि रूपाणि कथं भवन्ति। अत्र उत्तरं हि – पाणिनिमुनिना अत्र स्थान्यादेशभावः आश्रितः। तथाहि – राम इति अदन्तात् प्रातिपदिकात् चतुर्थ्येकवचने ङे इति प्रत्यये 'ङेर्यः' (पा.सू. ७.१.१३) इति सूत्रेण ङेः स्थाने य इति आदेशः विधीयते। तेन रामाय इति रूपं सिध्यति। एवमेव सर्व इति सर्वनामसंज्ञकात् अदन्तात् प्रातिपदिकात् चतुर्थ्येकवचने ङे इति प्रत्यये 'सर्वनाम्नः स्मै' (पा.सू. ७.१.१४) इति सूत्रेण ङेः स्थाने स्मै इत्यादेशे सर्वस्मै इति रूपं

सिध्यति। एवमेव युष्मद् इति प्रातिपदिकात् परस्य ङेः स्थाने 'ङे प्रथमयोरम्' (पा.सू. ७.१.२८) इति सूत्रेण अम् इत्यादेशे प्रक्रियाकार्ये तुभ्यम् इति रूपं सिध्यति। एवञ्च स्थान्यादेशकल्पनया संक्षेपेण बहूनि रूपाणि सिध्यन्ति।

## सिद्धासिद्धव्यवस्था

आचार्येण पाणिनिना अष्टाध्यायीग्रन्थनिर्माणसमये बहूनि कौशलानि अवलम्बितानि। तेषु सिद्धासिद्धव्यवस्थारूपं कौशलम् अन्यतमम्। 'पूर्वत्रासिद्धम्' (पा.सू. ८.२.१) इत्यनेन सूत्रेण सिद्धासिद्धव्यवस्था प्रतिपादिता। अस्य सूत्रस्य अर्थः उक्तः सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन – 'सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्'[१] इति। वस्तुतः प्रकृतसूत्रेण अष्टाध्यायी द्विधा विभज्यते। तत्र प्रकृतसूत्रात् पूर्वं विद्यमानानि यानि सूत्राणि सन्ति तेषां प्रथमः भागः। अत्र सप्त अध्यायाः, तथा अष्टमाध्यायस्य प्रथमपादस्य सर्वाणि सूत्राणि आगच्छन्ति। अयं भागः सपादसप्ताध्यायी इति उच्यते। प्रकृतसूत्रादनन्तरं विद्यमानानि यानि सूत्राणि सन्ति तेषां द्वितीयो भागः। अत्र अष्टमाध्यायस्य अन्तिमत्रयाणां पादानां सर्वाणि सूत्राणि आगच्छन्ति। अयं भागः त्रिपादी इति उच्यते। त्रयाणां पादानां समाहारः इति त्रिपादी। त्रिपादीस्थस्य प्रत्येकं सूत्रस्य कृते तदनन्तरं विद्यमानानि सूत्राणि असिद्धानि भवन्ति। सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा इत्यस्य उदाहरणं यथा – अर्जुन उवाच इत्यादि। अत्र यकारलोपः 'लोपः शाकल्यस्य' (८.३.१९) इत्यनेन त्रिपादीस्थेन सूत्रेण कृतः। 'आद्गुणः'

इत्यस्य सपादसप्ताध्यायीस्थसूत्रस्य दृष्ट्या 'लोपः शाकल्यस्य' इति त्रिपादीस्थसूत्रम् असिद्धम्। अतः तेन सूत्रेण कृतः यलोपः असिद्धः। अतः यलोपस्य असिद्धत्वात् अत्र गुणो न भवति। त्रिपाद्यमपि पूर्वं प्रति परं शास्त्रमसिद्धम् इत्यस्य उदाहरणं यथा– प्रशान् इत्यादि। प्रशाम् इति प्रातिपदिकस्य प्रथमैकवचनस्य रूपसिद्धौ 'मो नो धातोः' (पा.सू. ८.२.६४) इत्यनेन मकारस्य नकारादेशः भवति। अत्र 'मो नो धातोः' इति नकारादेशविधायकशास्त्रं 'नलोपः प्रातिपदिकान्तस्य' (पा.सू. ८.२.७) इति नलोपविधायकशास्त्रदृष्ट्या असिद्धमस्ति। यतो हि 'नलोपः प्रातिपदिकान्तस्य' इति सूत्रापेक्षया 'मो नो धातोः' इति परसूत्रमस्ति। अतः अत्र नकारस्य असिद्धत्वात् तस्य लोपो न भवति।

**उत्सर्गापवादभावः**

पाणिनीयव्याकरणे शब्दानुशासनार्थं ये उपायाः आश्रिताः तेषु अन्यतमोऽस्ति अयम् उत्सर्गावपादभावरूपोपायः। तत्र उत्सर्गापवादभावप्रसङ्गः महाभाष्यस्य पस्पशाह्निके विस्तरेण वर्णितः। शब्दानामनुशासनं कथं कर्तव्यम् इति प्रश्नः। अत्र उपायत्रयमस्ति – शब्दोपदेशः, अपशब्दोपदेशः उभयोपदेशश्चेति। तत्र शब्दोपदेशापशब्दोपदेशयोरन्यतरोपदेशेनैव शब्दानुशासनं सम्भवति। तथाहि भक्ष्यनियमेन अभक्ष्यप्रतिषेधो गम्यते। उदाहरणं यथा – 'पञ्च पञ्चनखाः भक्ष्याः' इत्युक्ते गम्यते यत् अन्ये अभक्ष्याः इति। तथैव अभक्ष्यप्रतिषेधेन भक्ष्यनियमो गम्यते। उदाहरणं यथा – 'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकरः' इत्युक्ते

आरण्यः भक्ष्यः इति गम्यते। एवमेव गौरिति साधुशब्दोपदेशे गाव्यादयः अपशब्दाः इति गम्यते। तथैव गाव्यादिष्वपशब्देषूपदिष्टेषु गौरिति साधुशब्दः इति गम्यते। अत्र पुनः प्रश्नो भवति यत् साधुशब्दोपदेशः कर्तव्यः अथवा अपशब्दः। अत्रोच्यते साधुशब्दोपदेशः एव करणीयः। यतो हि साधुशब्दाः अल्पाः। एकैकस्यापि साधुशब्दस्य बहवः अपशब्दाः सन्ति। अतः अपशब्दोपदेशे गौरवदोषः स्यात्। किञ्च साधुशब्दोपदेशे इष्टान्वाख्यानं च भवति। अत्र पुनः प्रश्नो भवति यत् साधुशब्दानामुपदेशः कथं करणीयः। शब्दानां प्रतिपदपाठः क्रियते चेत् मनुष्याणां जीवनकालः समाप्तो भविष्यति तथापि शब्दानां प्रतिपदपाठः समाप्तो न भविष्यति। तदुक्तं पस्पशाह्निके – 'एवं हि श्रूयते – बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच न चान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम। किं पुनरद्यत्वे। यः सर्वथा चिरं जीवति, वर्षशतं जीवति'[१०] इति। आधुनिके काले शब्दानां प्रतिपदपाठरूपोपायः नैव स्वीकर्तुं शक्यते। अतः कश्चन विशेषोपायः आश्रयणीयः, स एव उपायः उत्सर्गापवादन्यायः इति। तथाहि – उत्सर्गोपदेशः सामान्येन कर्तव्यः। अपवादश्च सामान्यस्य विशेषेण कर्तव्यः। उदाहरणं यथा – 'कर्मण्यण्' (पा.सू. ३.२.१) इति उत्सर्गशास्त्रम्। अनेन सूत्रेण कर्मणि उपपदे धातोः अण् प्रत्ययो भवति। यथा कुम्भं करोति इति कुम्भकारः इत्यादौ प्रकृतसूत्रेण अणप्रत्ययो जातः। अस्यैव उत्सर्गसूत्रस्य अपवादसूत्रं भवति 'आतोऽनुपसर्गे कः' (पा.सू.

३.२.३) इति। अनेन सूत्रेण उनुपसर्गेभ्यः आकारान्तेभ्यः धातुभ्यः कर्मण्युपपदे कप्रत्ययो भवति। उदाहरणं यथा – गां ददाति इति गोदः इति। अत्र कप्रत्ययः अणप्रत्ययस्य अपवादोऽस्ति। एवमुत्सर्गापवादरूपोपायेन शब्दानामनुशासनं क्रियते।

**अन्तरङ्गबहिरङ्गभावः**

पाणिनीयव्याकरणे शब्दानुशासनार्थमाश्रितेषु उपायेषु अन्यतमोऽयम् अन्तरङ्गबहिरङ्गभावरूपोपायः। अयमन्तरङ्गबहिरङ्गभावः 'असिद्धं बहिरङ्गमन्तरङ्गे'[११] इत्यनया परिभाषया प्रतिपादितः। तथाहि – अन्तः अङ्गानि यस्य तद् अन्तरङ्गम् इति अन्तरङ्गपदस्य विग्रहः। एवमेव बहिः अङ्गानि यस्य तद् बहिरङ्गम् इति बहिरङ्गपदस्य विग्रहः। अत्र अन्तः इत्यस्य अर्थो भवति मध्ये इति। अङ्गशब्दस्य अर्थो भवति निमित्तमिति। अङ्गशब्देन शब्दरूपं निमित्तमेव ग्राह्यम्। अत्र शङ्का भवति केषां मध्ये इति। तत्रोच्यते बहिरङ्गशास्त्रीयनिमित्तमुदायमध्ये इति। अर्थात् बहिरङ्गशास्त्रस्य यः निमित्तसमुदायः तन्मध्ये अन्तर्भूतमस्ति यस्य शास्त्रस्य निमित्तं तत् शास्त्रं भवति अन्तरङ्गशास्त्रम्। तथा च अन्तरङ्गशास्त्रस्य यः निमित्तसमुदायः तदपेक्षया बहिर्भूतमस्ति यस्य शास्त्रस्य निमित्तं तत् शास्त्रं भवति बहिरङ्गम्। असिद्धम् इति पदस्य अर्थः अनिष्पन्नमिति बोध्यम्। तेन अन्तरङ्गे कर्तव्ये कृतं बहिरङ्गं, समकालप्राप्तं वा बहिरङ्गम् असिद्धं भवतीति प्रकृतपरिभाषार्थः। अर्थात् अन्तरङ्गे कार्ये कर्तव्ये कृतमपि बहिङ्गकार्यम् अकृतमिव भवति। उदाहरणं

यथा – रियति इत्यादि। तथाहि – रि-गतौ इति धातोः लटि प्रथमपुरुषैकवचने तिपि शविकरणे अनुबन्धलोपे रि अ ति इत्यवस्थायां 'पुगन्तलघूपधस्य च' (पा.सू. ७.३.८६) इत्यनेन सूत्रेण लघूपधगुणः प्राप्नोति किञ्च 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (पा.सू. ६.४.७७) इत्यनेन सूत्रेण इयङ् प्राप्नोति। अत्र 'पुगन्तलघूपधस्य च' इति शास्त्रं बहिरङ्गमस्ति। यतो हि अत्र बहिर्भूतः तिप्प्रत्ययः निमित्तमस्ति। किञ्च 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति शास्त्रमन्तरङ्गमस्ति। यतो हि तिप्प्रत्ययापेक्षया अन्तर्भूतः शविकरणः अस्य शास्त्रस्य निमित्तमस्ति। तथा च अत्र लघूपधगुणः बहिर्भूतकार्यमस्ति। इयङादेशश्च अन्तरङ्गकार्यमस्ति। इयङादेशरूपे अन्तरङ्गकार्ये कर्तव्ये लघूपधगुणरूपं बहिर्भूतकार्यमसिद्धं भवति। अतः इयङादेश एव भवति। तेन रियति इति रूपं सिध्यति।

**ज्ञापनम्**

पदानां साधुत्वप्रतिपादनाय पाणिनिना सूत्रं प्रणितम्। यदा सूत्राणां प्रवृत्तौ विरोधः संशयो वा भवति तदा परिभाषाः आगच्छन्ति। तत्र काश्चन परिभाषाः पाणिनिना कृताः सूत्रात्मिकाः। उदाहरणं यथा – 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (पा.सू. १.१.६६) इति सूत्रात्मिका परिभाषा। काश्चन तदितरवचनरूपाः। अर्थात् पाणिनिना स्वयं न सूत्रिताः परन्तु बहुभिः प्रकारैः ज्ञापिताः। अत्र केचन ज्ञापनप्रकाराः आलोचिताः।

**सूत्रेण ज्ञापनम्**

पाणिनिना बहुभिः सूत्रैः वचनानि ज्ञापितानि। अत्र कानिचन सूत्राणि आलोचितानि। 'सरूपाणामेकशेष एकविभक्तौ' (पा.सू. १.२.६४) इत्यनेन सूत्रेण 'व्यक्तिः पदार्थः' इति वचनं ज्ञाप्यते। यतो हि 'व्यक्तिः पदार्थः' इति वचनं विना 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रं व्यर्थम्। प्रकृते वचने ज्ञापिते एव घटघटौ घटघटघटाः इत्याद्यनिष्टप्रयोगाः यथा न स्युः तदर्थं प्रकृतसूत्रं स्वांशे चरितार्थं भवति। अस्य वचनस्य फलं द्रव्याणि इत्यादिप्रयोगाः। अन्यथा जातिः पदार्थः इति पक्षे एकेनैव द्रव्यशब्देन बहूनां ज्ञानं भवतीति बहुवचनस्य साधुत्वं न स्यात्।

'नेटि' (पा.सू. ७.२.४) इत्यनेन सूत्रेण 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषा ज्ञापिता। तथाहि प्रकृतमिदं सूत्रम् अदेवीत्, असेवीत्, अकोषीत्, अमोषीत् इत्यादौ इडादौ सिचि हलन्तलक्षणा वृद्धिः यथा न स्यात् तदर्थमारब्धम्। परन्तु हलन्तलक्षणायाः वृद्धेः अभावे प्रकृतमिदं सूत्रं व्यर्थम्। 'वदव्रजहलन्तस्याचः' इति सूत्रेण वदव्रजोर्हलन्तानां चाङ्गानामचः स्थाने वृद्धिर्भवति, सिचि परस्मैपदेषु। परन्तु अदेवीत्, असेवीत् इत्यादौ वृद्धिः नैव प्राप्नोति, इटा व्यवधानात्। अतः प्रकृतमिदं सूत्रं व्यर्थीभूय पूर्वोक्तां परिभाषां ज्ञापयति। ज्ञापितायाञ्च अस्यां परिभाषायाम् अदेवीत्, असेवीत् इत्यादौ इटः आगमत्वात् तस्य ग्रहणं सिचो ग्रहणेन एव सम्भवति। तेन इटा न व्यवधानम्। अतः अदेवीत्, असेवीत् इत्यादौ प्राप्तायाः वृद्धेः वारणार्थं 'नेटि' इति सूत्रे स्वांशे चरितार्थं भवति।

अस्याः परिभाषायाः फलं सर्वेषाम् इत्यादौ 'बहुवचने झल्येत्' (पा.सू. ७.३.१०३) इति सूत्रेण एत्वविधानम्। अस्याः परिभाषायाः अभावे 'आमि सर्वनाम्नः सुट्' (पा.सू. ७.१.५२) इति सूत्रेण विहितस्य सुटः ग्रहणं सुपा न स्यात्। तेन सुड्विशिष्टस्य आमः सुब्ग्रहणेन ग्रहणासम्भवात् झलादित्वाभावात् एत्वं न स्यात्। एवमेव वचनज्ञापकानि अन्यान्यपि बहूनि सूत्राणि सन्ति।

**सूत्रस्थपदेन ज्ञापनम्**

बहुत्र सूत्रस्थपदैरपि परिभाषारूपं वचनं ज्ञापितम्। अत्र कानिचन पदानि आलोचितानि। 'थासः से' (पा.सू. ३.४.८०) इत्यस्मिन् सूत्रे से इति पदं 'तङादेशानां टेरेत्वं न भवति' इति ज्ञापनार्थमस्ति। अन्यथा से इति पदं व्यर्थम्। तथाहि 'थासः से' इति सूत्रमकृत्वा 'थः सः' इति न्यासेनापि थकारस्य सकारे कृते सास् इति जाते 'टित आत्मनेपदानां टेरे' इति सूत्रेण टिसंज्ञकस्य आस् इत्यस्य एत्वे से इति सिध्यति। तेन एधसे इत्यादिप्रयोगानां सिद्धिर्भविष्यति। अतः सिद्धे सति यदेकारान्तत्वामादेशस्य क्रियते, तज्ज्ञापयति – आत्मनेपदानां य आदेशास्तेषां टेरेत्वं न भवतीति। ज्ञापिते चास्मिन् वचने 'थः सः' इति सूत्रेण थकारस्य सकारे कृते टिभागस्य आस् इत्यस्य 'टित आत्मनेपदानां टेरे' इति एत्वं न प्राप्नोति, सकास्य तङादेशत्वात्। अतः एधसे इत्यादिप्रयोगानां सिद्ध्यर्थं से इति पदं स्वांशे चरितार्थं भवति। 'तङादेशानां टेरेत्वं न भवति' इति ज्ञापितस्य वचनस्य फलं पक्ता,

पक्तारौ, पक्तार इत्यादौ डारौरसामेत्वं न भवति। अन्यथा डारौरसामपि टिभागस्य एत्वं प्राप्नुयात्।

**पाणिनेः आचारेण ज्ञापनम्**

आचार्येण पाणिनिना सूत्रनिर्माणार्थं शब्दानां यः व्यवहारः कृतः स एव अत्र आचारशब्देन गृह्यते। पाणिनेः आचारादपि कानिचन वचनानि ज्ञापितानि भवन्ति। अत्र केचन व्यवहाराः उदाहरणरूपेण आलोचिताः।

'तदस्मिन्नधिकमिति दशान्ताड्डः' (पा.सू. ५.२.४५) इति सूत्रे अस्मिन्नधिकम् इति निर्देशः अधिकशब्दयोगे सप्तमी भवतीति वचनस्य ज्ञापकः। यतो हि अत्र 'षष्ठी शेषे' (पा.सू. २.३.५०) इति सूत्रेण अवधित्वसम्बन्धे षष्ठी एव स्यात् न सप्तमी। एवञ्च प्रकृतसूत्रे अस्मिन्नधिकम् इति सप्तम्यन्तनिर्देशः व्यर्थः। व्यर्थीभूय च अधिकशब्दयोगे सप्तमी भवतीति वचनं ज्ञापयति। ज्ञापिते च अस्मिन् वचने प्रकृतसूत्रे अस्मिन्नधिकम् इति अधिकशब्दयोगे सप्तम्यन्तप्रयोगः स्वांशे चरितार्थः। लोके अधिको हरिः इत्यादौ अधिकशब्दयोगे सप्तम्यन्तस्य प्रयोगः प्रकृतवचनस्य फलम्। अन्यथा एतद्वचनाभावे अधिकशब्दयोगे सप्तम्याः विधायकसूत्राभावात् लोके अधिको हरिः इत्यादिप्रयोगाः न सिध्यन्ति।

**प्रश्लेषः**

कदाचित् समस्यायाः समाधानार्थं पाणिनीयसूत्रस्य भिन्नरीत्या पदच्छेदं कृत्वा सूत्रार्थस्य परिवर्तनं क्रियते। एवञ्च पाणिनीयव्याकरणे बहुत्र नूतनार्थस्य निष्पत्तिः क्रियते। सा पद्धतिः प्रश्लेषः इति नाम्ना ज्ञायते। एकमुदाहरणं यथा 'नाज्झलौ' (पा.सू. १.१.१०) इति सूत्रम्। अत्र अच्च हल् च अज्झलौ इति विग्रहः। तेन प्रकृतसूत्रस्य अर्थो भवति तुल्यास्यप्रयत्नावपि अज्झलौ परस्परं सवर्णसंज्ञौ न भवतः इति। वस्तुतः अत्र यः अच् इति प्रत्याहारः अस्ति तेन प्रत्याहारेण केवलं माहेश्वरसूत्रे साक्षात् विद्यमानाः अ, इ, उ, ऋ, ऌ, ए, ऐ,ओ, औ इत्येते स्वराः एव गृह्यन्ते। अन्येषाम् आ, ई, ऊ, ॠ इत्येतेषां तथा सर्वेषां प्लुतभेदानाञ्च ग्रहणं न भवति। अर्थात् 'तुल्यास्यप्रयत्नं सवर्णम्' इत्यनेन सूत्रेण प्राप्तम् अकारहकारयोः सावर्ण्यं 'नाज्झलौ' इति सूत्रेण यद्यपि निवार्यते, तथापि आकारहकारयोः सावर्ण्यम्, एवमेव ईकारशकारयोः तथा ॠकारषकारयोः सावर्ण्यं तु न निवार्यते। वस्तुतः ईकारशकारयोः तथा ॠकारषकारयोः सावर्ण्यं विद्यते चेदपि न हानिः। यतो हि 'अणुदित् सवर्णस्य चाप्रत्ययः' (पा.सू. १.१.६९) इत्यस्मिन् सावर्ण्यग्राहकशास्त्रे अण् इति प्रत्याहारः गृहीतः। अणप्रत्याहारे च ईकारस्य, शकारस्य, ॠकारस्य, षकारस्य वा अन्तर्भावो नास्ति। अतः ईकारशकारयोः तथा ॠकारषकारयोः सावर्ण्यं विद्यते चेदपि व्याकरणशास्त्रे सवर्णग्रहणसमये न कुत्रापि ईकारग्रहणेन शकारग्रहणं, शकारग्रहणेन वा ईकारग्रहणं भविष्यति। एवमेव

ऋकारग्रहणेन षकारग्रहणं, षकारग्रहणेन ऋकारग्रहणं वा न कुत्रापि सम्भवति। परन्तु आकारहकारयोः सावर्ण्यं न निवार्यते चेत् दोषः भवत्येव। यद्यपि 'अणुदित् सवर्णस्य चाप्रत्ययः' इति सूत्रस्थेन अणप्रत्याहारेण आकारः न गृह्यते तथापि हकारस्तु गृह्यते एव। अतः यद्यपि आकारेण हकारस्य ग्रहणं न सम्भवति तथापि हकारग्रहणेन आकारस्य अनिष्टं ग्रहणम् अवश्यं सम्भवति। एवञ्च हकारेण आकारस्य ग्रहणं क्रियते चेत् विश्वपाभिः इत्यादौ अनिष्टं ढत्वं प्राप्नोति। तथाहि – विश्वपा भिस् इत्यवस्थायां 'हो ढः' इति सूत्रेण आकारस्य ढत्वं प्राप्नोति। यतो हि 'हो ढः' (पा.सू. ८.२.३१) इति सूत्रेण हकारस्य ढकारादेशो विधीयते झलि पदान्ते च। अत्र भकाररूपे झलि परे आकारस्यापि ढकारादेशो भवेत्, आकारहकारयोः सावर्ण्यात् हकारेण आकारस्यापि ग्रहणात्।

अत्र समस्यायाः समाधानार्थं 'नाज्झलौ' इत्यस्मिन् सूत्रे आकारस्य प्रश्लेषः क्रियते। नाज्झलौ इति सूत्रस्य अर्थः आकारसहितोऽच् आच् स च हल् चेत्येतौ मिथः सवर्णौ न स्तः इति स्वीक्रियते। तेन आकारस्य अच्-वर्णस्य च हल्-वर्णेन सह सावर्ण्यं न भवतीति बोध्यम्। एवञ्च आकारस्य प्रश्लेषं कृत्वा आकारस्य हकारेण सह सावर्ण्यं निवार्यते, तेन हकारग्रहणेन आकारग्रहणस्य अनिष्टापत्तेः अपि निषेधो भवति। एवमेव अन्यत्रापि बहुत्र प्रश्लेषस्य साहाय्येन समास्यायाः समाधानं क्रियते।

**योगविभागः**

पाणिनीयव्याकरणे न केवलं सूत्रैः पदसिद्धिः भवति अपि तु सूत्रैः सह वार्त्तिकानां भाष्याणाञ्च आवश्यकता वर्तते। पदसिद्ध्यर्थं यथा व्याख्याने उदाहरणप्रत्युदाहरणवाक्याध्याहारादीनामावश्यकता दृश्यते तथैव अपरे केचन पदसिद्ध्युपायाः सन्ति। येषां शब्दानां सिद्धिप्रक्रिया पाणिनीयसूत्रेण न सिद्ध्यति तेषां शब्दानां सिद्ध्यर्थं योगविभागाद्युपायाः आश्रियन्ते। 'योगविभागाद् इष्टसिद्धिः' इत्येका परिभाषा अस्ति। तेन इष्टस्य शब्दस्य साधुत्वप्रतिपादनार्थमेव योगविभागः क्रियते न त्वनिष्टस्य सिद्धये।

**योगशब्दस्य अर्थः**

'योगे-योगे तवस्तरं वाजे-वाजे हवामहे। सखाय इन्द्रमूतये॥'[१२] इत्यादौ ऋग्वेदे योगशब्दस्य उल्लेखः दृश्यते। अस्य मन्त्रस्यार्थः सायणाचार्येण एवं प्रतिपादितः – 'योगे योगे प्रवेशे प्रवेशे तत्कर्मोपक्रमे' इति। युजिर् योगे इति धातोः 'हलश्च' (पा.सू. ३.३.१२१) इति सूत्रेण घञ्प्रत्यये 'चजोः कु घिण्यतोः' (पा.सू. ७.३.५२) इति सूत्रेण कुत्वे योगशब्दः निष्पद्यते इति सायणाचार्येण स्वीकृतम्। 'अथ योगानुशासनम्' इति प्रथमयोगसूत्रभाष्ये व्यासदेवेन 'योगः समाधिः' इति व्याख्या कृता। वस्तुतः चित्तवृत्तेः निरोधः एव योगः। तदुक्तं भगवता पतञ्जलिना द्वितीये सूत्रे 'योगश्चित्तवृत्तिनिरोधः' इति। श्रीमद्भगवद्गीतायामुक्तं – 'योगः कर्मसु कौशलम्' इति। तत्र यथास्थितवस्तुनः अन्यथारूपप्रतिपादने योगशब्दः

व्यवह्रियते। यथा – संसारबन्धनहेतोरपि कर्मणः अबन्धमोक्षहेतुत्वम्। व्याकरणशास्त्रे योगशब्दस्यार्थः सूत्रम्। सूत्राण्येव योगपदेन गृह्यन्ते। महाभाष्ये बहुत्र सूत्रार्थे योगशब्दस्य प्रयोगः दृश्यते। अर्थात् योगविभागः इत्यनेन पाणिनीयसूत्राणां विभागः इति बोध्यम्।

**योगविभागस्य सामान्यपरिचयः**

प्राचीनकाले शिष्याः शास्त्राणि गुरुमुखात् श्रुत्वा मनसि धारयन्ति स्म। अध्ययनाध्यापनरीतिः सर्वथा मौखिकी आसीत्। अतः प्राचीनशास्त्राणि सूत्राकारेण रचितानि दृश्यन्ते। सूत्राण्यपि संहितारूपेणैव पठितानि स्मृतिसौकर्यार्थम्। व्याकरणशास्त्रस्य सूत्राण्यपि संहिताक्रमेणैव पठितानि। भगवता पाणिनिनापि अष्टाध्यायी संहिताक्रमेणैव लिखिता। अनन्तरं प्रवचनकाले योगविभागं कृत्वा उपदिष्टा। पाणिनिः स्वशिष्यान् सूत्रविच्छेदं कृत्वा उपदिदेश इत्यत्र भाष्यमेव प्रमाणम्। तथाहि उक्तं महाभाष्ये – 'उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः। केचिद् आकडारादेका संज्ञा इति, केचित् प्राक्कडारात् परं कार्यमिति।'[१३]

महाभाष्ये बहुत्र पतञ्जलिः पूर्ववर्तिवृत्तिकाराणां योगविभागं न स्वीकरोति। स्वयमेव भिन्नरूपेण योगविभागं करोति। यथा 'यञश्च' (पा.सू. ४.१.१६) इति सूत्रस्य भाष्ये उक्तं – 'नैवं विज्ञायते – कञक्करपो यञश्चेति। कथं तर्हि। कञक्करपोऽयञश्चेति।'[१४] एवमेव महाभाष्ये बहुत्र अष्टाध्यायी संहितारूपेणैव रचिता इति ध्वनिता। किञ्च संहितापाठस्वीक्रियते चेदेव योगविभागपरम्परा सिध्यति। एवं

'पाणिनीयव्याकरणे पदसिद्ध्यर्थमाश्रितेषूपायेषु योगविभागः' इति नामधेये प्रथमे अध्याये संज्ञाकरणम्, अनुबन्धकरणम्, स्थान्यादेशभावः, सिद्धासिद्धव्यवस्था, उत्सर्गापवादभावः, अन्तरङ्गबहिरङ्गभावः, ज्ञापनम्, प्रश्लेषः इत्येते उपायाः संक्षेपेण पर्यालोचिताः। अन्ते च योगविभागरूपः उपायः विस्तरेण वर्णितः।

## द्वितीयोऽध्यायः – समासाधिकारस्थानां प्रत्ययाधिकारस्थानां च योगविभागानां समीक्षा

'समासाधिकारस्थानां प्रत्ययाधिकारस्थानाञ्च योगविभागानां समीक्षा' इत्यस्ति मम शोधप्रबन्धस्य द्वितीयोऽध्यायः। अस्मिन् अध्याये समासाधिकारस्थाः योगविभागाः तथा प्रत्ययाधिकारस्थाः योगविभागाः आलोचिताः। तत्र 'प्राक् कडारात् समासः' (पा.सू. २.१.३) इत्यनेन सूत्रेण समासाधिकारः निर्धार्यते। समासाधिकारविधायकस्य सूत्रस्यास्य अर्थः – 'कडाराः कर्मधारये' (पा.सू. २.२.३८) इति सूत्रात् प्राक् समासः इत्यधिक्रियते इति। अर्थात् अष्टाध्याय्याः द्वितीयाध्यायस्य प्रथमपादस्य तृतीयसूत्रादारभ्य द्वितीयपादस्य अष्टत्रिंशत् सूत्रपर्यन्तं समासाधिकारः वर्तते। समासाधिकारेऽस्मिन् त्रयाणां सूत्राणां योगविभागः आलोचितः। तानि सूत्राणि हि – 'सह सुपा' (पा.सू. २.१.४), 'तृतीया तत्कृतार्थेन गुणवचनेन' (पा.सू. २.१.३०), 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' (पा.सू. २.१.३६) चेति।

प्रत्ययाधिकारविधायकं सूत्रं तावत् – 'प्रत्ययः' (पा.सू. ३.१.१) इति। अनेन सूत्रेण पञ्चमाध्यायस्य परिसमाप्तिपर्यन्तं प्रत्ययाधिकारः विधीयते। अर्थात् तृतीयाध्यायस्य प्रथमपादस्य प्रथमसूत्रादारभ्य आपञ्चमाध्यायपरिसमाप्तेः प्रत्ययाधिकारो वर्तते। प्रत्ययाधिकारेऽस्मिन् प्रायः पञ्चशताधिकाः प्रत्ययाः विहिताः। तेषु 'गुप्तिज्किद्भ्यः सन्' (पा.सू. ३.१.५) इति सूत्रेण विधीयमानः सन्-प्रत्ययः प्रथमः प्रत्ययः अस्ति, तथा 'उरःप्रभृतिभ्यः कप्' (पा.सू. ५.४.१५१) इत्यनेन सूत्रेण विधीयमानः कप्-प्रत्ययः अन्तिमः प्रत्ययः अस्ति। प्रत्ययाधिकारेऽस्मिन् त्रयोदशसूत्राणां योगविभागः आलोचितः। तानि सूत्राणि हि– 'श्लिष आलिङ्गने' (पा.सू. ३.१.४६), 'सुपि स्थः' (पा.सू. ३.२.४), 'तौ सत्' (पा.सू. ३.२.१२७), 'लृट् शेषे च' (पा.सू. ३.३.१३), 'अनद्यतने लुट्' (पा.सू. ३.३.१५), 'क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः' (पा.सू. ३.४.२), 'युष्मदस्मदोरन्यतरस्यां खञ् च' (पा.सू. ४.३.१), 'तस्मिन्नणि च युष्माकास्माकौ'(पा.सू. ४.३.२), 'संज्ञायां कुलालादिभ्यो वुञ्' (पा.सू. ४.३.११७), 'विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्' (पा.सू. ५.१.२४), 'तत्र च दीयते कार्यं भववत्' (पा.सू. ५.१.९६), 'किमिदम्भ्यां वो घः' (पा.सू. ५.२.४०), 'एतदोऽन्' (पा.सू. ५.३.५) चेति। तत्र प्रत्येकं सूत्राणां योगविभागालोचनावसरे आदौ आक्षेपः कृतः, तदनन्तरं योगविभागेन समाधानं कृतम्। अन्ते च समीक्षा कृता।

## तृतीयोऽध्यायः – अङ्गाधिकारस्थानां योगविभागानां समीक्षा

मम शोधप्रबन्धस्य तृतीयोऽध्यायः 'अङ्गाधिकारस्थानां योगविभागानां समीक्षा' इति। पाणिनीयव्याकरणे व्यवहृतासु संज्ञासु अन्यतमा अस्ति अङ्गम् इति संज्ञा। 'यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' (पा.सू. १.४.१३) इत्यस्ति अङ्गसंज्ञाविधायकं सूत्रम्। सूत्रेऽस्मिन् पञ्च पदानि सन्ति। तत्र यस्मात् इति पञ्चम्येकवचनान्तं पदम्। प्रत्ययविधिः इति प्रथमैकवचनान्तं पदम्। तदादि इत्यपि प्रथमैकवचनान्तं पदम्। प्रत्यये इति सप्तम्येकवचनान्तं पदम्। अङ्गम् इति प्रथमैकवचनान्तं संज्ञाबोधकं पदम्। सूत्रस्यास्यार्थो भवति – यस्मात् शब्दात् प्रत्ययः विधीयते, तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परे अङ्गसंज्ञं स्यादिति। तदुक्तं भट्टोजिदीक्षितेन – 'यः प्रत्ययो यस्मात्क्रियते तदादि शब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात्'[१५] इति। अत्र भवामि भविष्यामीत्यादौ विकरणविशिष्टस्य अङ्गसंज्ञार्थं तदादिग्रहणम्। प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा अङ्गसंज्ञाप्रतिषेधार्थं सूत्रे प्रत्यये इति पदस्य ग्रहणं कृतम्। यस्मात् शब्दात् साक्षात् प्रत्ययः विधीयते तस्य शब्दस्य प्रक्रियायां कुत्रचित् सम्पूर्णरूपेण लोपः सम्भवति। तदा कस्माच्चित् अन्यस्मादेव शब्दात् प्रत्ययः दृश्यते। तादृशे स्थले तस्य अङ्गसंज्ञा मा भूत् तदर्थं सूत्रे विधिः इति पदस्य ग्रहणं कृतम्। 'अङ्गस्य' (पा.सू. ६.४.१) इति सूत्रेण अङ्गाधिकारः निर्दिश्यते। षष्ठाध्यायस्य चतुर्थपादस्य प्रथमसूत्रादारभ्य सप्तमाध्यायस्य परिसमाप्तिपर्यन्तम् अङ्गाधिकारः वर्तते। तेन आहत्य पञ्चसु पादेषु

विहितानि सर्वाणि कार्याणि अङ्गविषयकानि एव सन्ति। अस्मिन् अङ्गाधिकारे केचन योगविभागाः साक्षात् तत्तत्सूत्रे एव स्वीकृताः, केचन योगविभागाः अन्यसूत्रस्य भाष्ये स्वीकृताः। एवञ्च अस्मिन् अध्याये अष्टादशसूत्राणां योगविभागाः आलोचिताः। तानि सूत्राणि हि – 'अज्झनगमां सनि' (पा.सू. ६.४.१६), 'जनसनखनां सञ्झलोः' (पा.सू. ६.४.४२), 'यस्य हलः' (पा.सू. ६.४.४९), 'अयामन्ताल्वाय्येत्न्विष्णुषु' (पा.सू. ६.४.५५), 'एरनेकाचोऽसंयोगपूर्वस्य' (पा.सू.६.४.८२), 'उतश्च प्रत्ययादसंयोगपूर्वात्' (पा.सू. ६.४.१०६), 'अल्लोपोऽनः' (पा.सू. ६.४.१३४), 'आतो धातोः' (पा.सू. ६.४.१४०), 'आत्मनेपदेष्वनतः' (पा.सू. ७.१.५), 'षड्भ्यो लुक्' (पा.सू. ७.१.२२), 'णलुत्तमो वा' (पा.सू. ७.१.९१), 'णेरध्ययने वृत्तम्' (पा.सू. ७.२.२६), 'आर्धधातुकस्येड् वलादेः' (पा.सू. ७.२.३५), 'उपदेशेऽत्वतः' (पा.सू. ७.२.६२), 'बहुवचने झल्येत्' (पा.सू. ७.३.१०३), 'ह्रस्वस्य गुणः' (पा.सू. ७.३.१०८), 'ऋदृशोऽङि गुणः' (पा.सू. ७.४.१६),'हलादिः शेषः' (पा.सू. ७.४.६०) चेति।

### चतुर्थोऽध्यायः – पदाधिकारस्थानां योगविभागानां समीक्षा

मम शोधप्रबन्धस्य चतुर्थोऽध्यायः 'पदाधिकारस्थानां योगविभागानां समीक्षा' इति। पाणिनीयव्याकरणे वर्णानां शब्दानां च संक्षेपेण निर्देशार्थं नैकाः संज्ञाः व्यवहृताः। तासु अन्यतमा अस्ति पदम् इति संज्ञा। 'अपदं न प्रयुञ्जीत' इति वचनानुसारं संस्कृतभाषायां वाक्येषु केवलं पदसंज्ञकस्यैव प्रयोगः भवति। ये शब्दाः

पदसंज्ञकाः न सन्ति तेषां प्रयोगः वाक्ये नैव करणीयः इति अस्य नियमस्य आशयः। पदशब्देन 'शक्तं पदम्' इत्यनुसारं शक्तिविशिष्टस्यापि ग्रहणं भवति। अर्थात् यस्मिन् शब्दे अर्थाभिधानस्य शक्तिः वर्तते, तत् शब्दस्वरूपं पदशब्देन गृह्यते। एवञ्च शाब्दबोधे बहुत्र प्रत्ययानाम्, प्रातिपदिकानां, धातूनाञ्च निर्देशः दृश्यते। तत्र तेषां शक्तिग्राहकत्वात्पदत्वं स्वीकृत्य व्यवहारः दृश्यते। 'सुप्तिङन्तं पदम्'(पा.सू.१.४.१४)इति सूत्रादारभ्य 'स्वादिष्वसर्वनामस्थाने' (पा.सू. १.४.१७) इति सूत्रपर्यन्तं चतुर्भिः सूत्रैः पदसंज्ञा विधीयते। यद्यपि अष्टाध्याय्यां पदसंज्ञाविधायकानि चत्वारि सूत्राणि सन्ति, तथापि 'अपदं न प्रयुञ्जीत' इति वचने प्रयुक्तः पदम् इति शब्दः केवलं प्रथमसूत्रेण विहितायाः पदसंज्ञायाः एव बोधकः अस्ति। तत्र प्रथमसूत्रेण सुप्प्रत्ययान्तशब्दानां तिङ्प्रत्ययान्तशब्दानां च पदसंज्ञा विधीयते। अष्टाध्याय्यां 'पदस्य' (पा.सू. ८.१.१६) इत्यनेन सूत्रेण पदाधिकारः विधीयते। 'अपदान्तस्य मूर्धन्यः' (पा.सू. ८.३.५५) इति सूत्रं यावत् पदाधिकारो वर्तते। अस्मिन् अधिकारे सप्तसूत्राणां योगविभागः आलोचितः। तानि सूत्राणि हि– 'सामान्यवचनं विभाषितं विशेषवचने' (पा.सू. ८.१.७३), 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (पा.सू. ८.२.४), 'झलां जशोऽन्ते' (पा.सू. ८.२.३९), 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (पा.सू. ८.२.४२), 'रायो हलि' (पा.सू. ७.२.८५), 'विभाषा पृष्टप्रतिवचने हेः' (पा.सू. ८.२.९३), 'कुप्वोः ≍क≍पौ च' (पा.सू. ८.३.३७)

चेति। तेषु 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यस्य पदाधिकारस्थस्य सूत्रस्य योगविभागः 'एकः पूर्वपरयोः' (पा.सू. ६.१.८४) इति सूत्रस्य भाष्ये आलोचितः।

## पञ्चमोऽध्यायः – अवशिष्टानां योगविभागानां समीक्षा

'अवशिष्टानां योगविभागानां समीक्षा' इत्यस्ति पञ्चमोऽध्यायः। अवशिष्टात्मकेऽस्मिन् अध्याये ते एव योगविभागाः आलोचिताः ये पूर्वेषु अध्यायेषु नान्तर्भूताः। एकादशसूत्राणां योगविभागः अत्र समीक्षितः। तानि सूत्राणि हि – 'अदसो मात्' (पा.सू. १.१.१२), 'तृतीयासमासे' (पा.सू. १.१.३०), 'न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु' (पा.सू.१.१.५८), 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' (पा.सू. २.३.१७), 'कृत्यानां कर्तरि वा' (पा.सू. २.३.७१), 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (पा.सू. २.४.२), 'उपसर्गादृति धातोः' (पा.सू. ६.१.९१), 'अमि पूर्वः' (पा.सू. ६.१.१०६), 'कुरुगार्हपतरिक्तगुर्वसूतजरत्य-श्लीलदृढरूपापारेवडवातैतिलकद्रूः पण्यकम्बलो दासीभाराणां च' (पा.सू. ६.२.४२), 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (पा.सू. ८.४.२), 'स्तोः श्चुना श्चुः' (पा.सू. ८.४.४०) चेति।

## उपसंहारः

'महाभाष्यदिशा योगविभागसमीक्षा' इति शीर्षकोपेतः उपोद्घातोपसंहारविशिष्टः मम शोधप्रबन्धः पञ्चभिः अध्यायैः विभक्तः। शोधप्रबन्धेऽस्मिन् आहत्य द्विपञ्चाशत् योगविभागाः आलोचिताः। तेषु बहुत्र

योगविभागं स्वीकृत्य समस्यायाः समाधानं क्रियते चेदेव समीचीनम्। यथा 'ऋद्दशोऽङि गुणः' (पा.सू. ७.४.१६) इत्यत्र योगविभागः स्वीक्रियते चेदेव वरम्। महाभाष्यकारेण योगविभागं स्वीकृत्य तच्छेषपक्ष एव स्वीकृतः। यतो हि इकः इति पदोपस्थितिपक्षे इकः विशेषणविशेष्यभावस्य कामचारात् न हि कश्चिदपि पक्षे नियमः स्यात्। तेन गौरवदोषः स्यात्। तथाहि तत्र प्रकृतषष्ठ्यन्तपदोपस्थितषष्ठ्यन्तपदयोर्मध्ये विशेषणविशेष्यभावः कामचारात् भवति। अर्थात् गृह्यमाणषष्ठ्यन्तपदेन इकं विशेषयितुम्, अथवा उपस्थितषष्ठ्यन्तेन इका गृह्यमाणं षष्ठ्यन्तपदं विशेषयितुं स्वतन्त्रता विद्यते। यथा – 'मिदेर्गुणः' (पा.सू. ७.३.८२) इत्यत्र गृह्यमाणषष्ठ्यन्तं मिदेः इति पदं विशेषणं तथा इकः इति उपस्थितषष्ठ्यन्तपदं विशेष्यम् इति स्वीक्रियते। तेन सूत्रस्यार्थो भवति – मिदेः अङ्गस्य इको गुणो भवति शिति प्रत्यये परे इति। परन्तु 'जुसि च' (पा.सू. ७.३.८३) इत्यत्रोपस्थितं षष्ठ्यन्तं पदं विशेषणं तथा गृह्यमाणषष्ठ्यन्तम् अङ्गस्य इति पदं विशेष्यमिति स्वीक्रियते। तेन सूत्रार्थो भवति – जुसि च प्रत्यये परे इगन्तस्य अङ्गस्य गुणो भवतीति। एवं लक्ष्यानुसारम् इकः इति पदं कुत्रचित् विशेषणं भवति कुत्रचिच्च विशेष्यं भवति। परन्तु कुत्र विशेषणं भवति कुत्र च विशेष्यं भवतीति नास्ति कोऽपि नियमः। तेन विशेषणविशेष्यभावस्य कामचारात् गौरवदोषः सिध्यति। अतः अत्र योगविभागं स्वीकृत्य तच्छेषपक्ष एव स्वीकार्यः। एवमेव 'तृतीयासमासे' (पा.सू. १.१.३०) इत्यत्रापि योगविभागः स्वीक्रियते चेदेव वरम्।

तथाहि 'विभाषा दिक्समासे बहुव्रीहौ' (पा.सू. १.१.२८) इति सूत्रात् समासे इति पदमनुवर्तते तथापि 'तृतीयासमासे' इति सूत्रे समासे इति पदस्य ग्रहणं तृतीयासमासार्थवाक्येऽपि प्रतिषेधो यथा स्यात् तदर्थं कृतमिति प्रतिपादितं सिद्धान्तकौमुद्याम्। ननु यदि तृतीयासमासपदं तृतीयासमासार्थपदबोधकमिति स्वीक्रियते तर्हि समुदाये अर्थात् मुख्ये तृतीयासमासे सर्वनामसंज्ञायाः निषेधः न स्यात्। तेन मासपूर्वाय इत्यादौ तृतीयासमासे सर्वादिगणपठितशब्दानां सर्वनामसंज्ञायां मासपूर्वस्मै इत्यनिष्टं रूपं स्यात्। अत्रोच्यते – वाक्यभेदेन मुख्ये समासे निषेधः भवतीति। तथाहि तृतीया इति प्रथमं वाक्यम्। अत्र तृतीया इति लुप्तषष्ठीकं पदमस्ति। 'विभाषा दिक्समासे बहुव्रीहौ' इत्यस्मात् सूत्रात् समासे इत्यनुवर्तते। अत्रानुवर्तमानं समासपदं प्राथमकल्पिकसमासपरमस्ति। अर्थात् तृतीया इति प्रथमवाक्यद्वारा मासपूर्वाय इत्यादौ मुख्यसमासे सर्वादिगणपठितशब्दानां सर्वनामसंज्ञायाः निषेधो भवति। 'समासे' इति द्वितीयं वाक्यम्। अत्र तृतीया इति अनुवर्तते। अत्र समासे इत्यस्यार्थः अस्ति समासार्थवाक्ये इति। तेन द्वितीयवाक्यस्यार्थो भवति – तृतीयासमासार्थवाक्ये सर्वादिगणपठितशब्दानां सर्वनामसंज्ञा न भवतीति। तेन 'तृतीया' इति प्रथमवाक्येन प्राथमकल्पिकसमासे अर्थात् मुख्यतृतीयासमासे सर्वनामसंज्ञायाः निषेधः, 'समासे' इति द्वितीयवाक्येन च समासार्थवाक्ये अर्थात् विग्रहे सर्वनामसंज्ञायाः निषेधो भवति। अतः मासपूर्वाय देहि, मासेन पूर्वाय देहि इत्यादौ न कुत्रापि दोषः। तथापि

अत्र योगविभागः क्रियते चेदेव वरम्। यतो हि अनुवर्तमानस्य समासपदस्य समासार्थवाक्यबोधकत्वस्वीकारे न कापि हानिः। अतः समासार्थवाक्यबोधनार्थं पुनः समासपदग्रहणस्य आवश्यकता नास्ति। अपि च पुनर्गृहीतस्य समासपदस्य समासार्थवाक्यबोधकत्वस्वीकारे प्राथमकल्पिकसमासे अर्थात् मुख्यतृतीयासमासे सर्वनामसंज्ञायाः निषेधः न भवति। मुख्यतृतीयासमासे सर्वनामसंज्ञायाः निषेधार्थं पृथक्तया वाक्यभेदस्य आवश्यकता भवति। वाक्यभेदश्च योगविभागं विना न सम्भवति। अतः योगविभागेन उभयत्र सर्वनामसंज्ञायाः निषेधः क्रियते चेदेव वरम्। एवमेव 'किमिदम्भ्यां वो घः' इत्यत्र यद्यपि किमिदम्भ्यां परस्य वतुपः वकारस्य घविधानसामर्थ्यादेव एतद् ज्ञायते यत् किमिदम्भ्यां परं वतुप्प्रत्ययो भवतीति। तथापि अत्र योगविभागः स्वीक्रियते चेदेव वरम्। यतो हि योगविभागस्वीकारे स्पष्टप्रतिपत्तिर्भवति। किञ्च अत्र घकारादेशविधानसामर्थ्यात् वतुप्प्रत्ययस्य अनुमानं क्रियते चेदपि तत्र वतुप्प्रत्ययः कस्मिन् अर्थे अनुमीयते इति आक्षेपः पुनः मनसि उदेति। अर्थात् अत्र अर्थस्यापि अनुमानं करणीयम्। तदपेक्षया योगविभाग एव उचितः। किञ्च योगविभागस्वीकारे कोऽपि सन्देहो न भवतीति मे मतिरिति शिवम्।

१ पा.भा., सम्पा. वासुदेव शरण अग्रवाल, अध्याय ८

२ पा.उ.पु., १८.१९

३ सं.व्या.शा. का.इ., प्रथमभागः, पृ.सं. १८६

४ तदेव, पृ.सं. १८२

५ पा.उ.पु., १८.१५

६ वा.प., वाक्यकाण्डम्, श्लो.सं.४७७

७ व्या.म.भा., प्रथमभागः, सम्पा. भार्गवशास्त्री जोशी, पृ.सं.३३०

८ तदेव, प्रथमभागः, पृ.सं. ८१

९ वै.सि.कौ., प्रथमभागः, सम्पा. गुरुप्रसादशास्त्री, सीतारामशास्त्री बालशास्त्री च, पृ.सं. १९

१० व्या.म.भा., प्रथमभागः, सम्पा. भार्गवशास्त्री जोशी, पृ.सं. ५४

११ प.भा.शे., सम्पा. विश्वनाथः मिश्रः, पृ.सं. १८०

१२ ऋग्वेदः, १.६.३०.७

१३ व्या.म.भा., द्वितीयभागः, सम्पा. भार्गवशास्त्री जोशी, पृ.सं. १९१

१४ तदेव, चतुर्थभागः, पृ.सं. ५०

१५ वै.सि.कौ., सम्पा. गुरुप्रसादशास्त्री, सीतारामशास्त्री बालशास्त्री च, प्रथमभागः, पृ.सं. १३६

* * *

# परिशीलितग्रन्थपञ्जी


अमरसिंहः। *अमरकोषः*। सम्पा. शिवदत्तदाधिमथः वासुदेवलक्ष्मणशास्त्री पणशीकरः। दिल्ली : चौखाम्बा संस्कृत प्रतिष्ठान, २०१७ (पुनर्मुद्रणम्; १९८१ प्रथमसंस्करणम्)।

आचार्यः, के. वि. रामकृष्णः। *भूषणसारतत्त्वप्रकाशिका*। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०१०।

आचार्यः, रामचन्द्रः। *प्रक्रियाकौमुदी* (*प्रकाश*व्याख्यासिहता)। सम्पा. पण्डितश्रीमुरलीधरमिश्रः। वाराणसी : सम्पूर्णानन्द् कृष्णदास अकादमी, २०००।

आचार्यः, सत्यनारायणः। *Research Methodology*। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०१२।

किशोरचन्द्रपाढी। *पाणिनीयव्याकरणे योगविभागविमर्शः।* दिल्ली: भारतीय बुक कार्पोरेशन, २००१।

कौण्डभट्टः। *बृहद्वैयाकरणभूषणम्।* सम्पा. श्रीमनुदेवः भट्टाचार्यः। वाराणसी : चौखम्बा अमरभारती प्रकाशन, १९८५।

______। *बृहद्वैयाकरणभूषणम्।* सम्पा. श्रीमनुदेवः भट्टाचार्यः। वाराणसी : चौखम्बा अमरभारती प्रकाशन, १९८५।

______। *वैयाकरणभूषणसारः* (*तत्त्वदर्शिनी*व्याख्योपेता)। सम्पा. सूर्यनारायणः शास्त्री। तिरुपतिः : श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, २०१६।

कौण्डभट्टः। *वैयाकरणभूषणसारः* (*प्रभादर्पण*युतः)। वाराणसी : आदर्शग्रन्थमाला, १९४७।

______। *वैयाकरणभूषणसारः* (*सावित्री*व्याख्योपेतः)। सम्पा. आद्याप्रसादः मिश्रः। वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, १९८८।

______। *वैयाकरणभूषणसारः* (*सुबोधिनी*व्याख्योपेतः)। सम्पा. चन्द्रिकाप्रसादः द्विवेदी। वाराणसी : चौखबा संस्कृत-प्रतिष्ठान, २०१३।

गङ्गाधरकरः। *शब्दार्थसम्बन्धसमीक्षा।* कलिकाता : यादवपुर-विश्वविद्यालयः, २०१५।

गदाधरभट्टाचार्यः। *व्युत्पत्तिवादः* (*विद्वन्मनोरमा*व्याख्योपेतः)। सम्पा. हरेकृष्णः शतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०११।

______। *व्युत्पत्तिवादः* (हिन्दीव्याख्योपेतः)। सम्पा. वैद्यनाथः झा। जयपुरम् : हंसप्रकाशनम्, २००१।

जगदीशः। *शब्दशक्तिप्रकाशिका।* सम्पा. धुनधीराजः शास्त्री। वाराणसी : चौखम्बा संस्कृत संस्थानम्, २००२।

जयकृष्णशर्मा। *शब्दार्थसारमञ्जरी* (हिन्दीव्याख्योपेता)। सम्पा. डा. रमेशचन्द्रः पण्डा। वाराणसी : काशी-हिन्दू-विश्वविद्यालयः, १९९७।

______। *सारमञ्जरी* (सटिप्पणी सानुवादा च)। सम्पा. डा. रवीन्द्रनाथः शास्त्री। कलकाता : रामकृणिमशन इन्सटीट्यूट आप कलचारइरिप्रतिष्ठानम्, १९९७।

ताताचार्यः, रामानुजः। *शाब्दबोधमीमांसा* (चतुर्थः भागः)। देहली : राष्ट्रिय-संस्कृत -संस्थानम्, २००८।

नागेशभट्टः। *परमलघुमञ्जुषा* (*बालबोधिनी* हिन्दीव्याख्योपेता च)। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०११।

_______। *परमलघुमञ्जूषा* (*किरणावली*टीकोपेता हिन्दीव्याख्योपेता च)। सम्पा. लोकमणिः दाहालः। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११।

_______। *परमलघुमञ्जूषा* (*वंशीटी*कोपेता)। वाराणसी : चौखम्बा विद्या भवनम्, २००८।

_______। *परिभाषेन्दुशेखरः* (*सुबोधिनी*व्याख्योपेतः)। सम्पा. श्रीविश्वनाथः मिश्रः। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१४।

_______। *लघुशब्देन्दुशेखरः* (कारकप्रकरणम्)। सम्पा. तेजपालः शर्मा। वाराणसी : तारा प्रिंटिंस वर्क्स, २००२।

_______। *लघुशब्देन्दुशेखरः* (*सुबोधिनी*व्याख्योपेतः)। सम्पा. विश्वनाथः मिश्रः। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०१२।

_______। *लघुशब्देन्दुशेखरः।* सम्पा. सत्यनारायणमूर्तिः। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २००८।

_______। *वैयाकरणसिद्धान्तमञ्जुषा।* सम्पा. कालिकाप्रसादः शुक्लः। वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, १९७७।

_______। *वैयाकरणसिद्धान्तमञ्जुषा।* सम्पा. कालिकाप्रसादः शुक्लः। वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, १९७७।

_______। *वैयाकरणसिद्धान्तमञ्जूषा।* नई दिल्ली : राष्ट्रियसंस्कृतसंस्थानम्, २००६।

पतञ्जलिः। *व्याकरणमहाभाष्यम्* (*भावबोधिनी* हिन्दीव्याख्योपेतञ्च)। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०१३।

_______। *व्याकरणमहाभाष्यम्* (*भाष्यप्रदीपोद्यत*सहितम्)। सम्पा. भार्गवशास्त्री जोशी। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २००४ (पुनर्मुद्रणम्)।

पाणिनिः। *अष्टाध्यायी।* सम्पा. श्रीगोपालदत्तपाण्डेयः। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११।

_______। *पाणिनीयशिक्षा*। सम्पा. विद्यासागरदामोदरमहतः। दिल्ली : मोतिलाल बनारसीदास, २००२ (पुनर्मुद्रणम्; १९९० प्रथमसंस्करणम्)।

पुरुषोत्तमदेवः। *कारकचक्रम्*। सम्पा. तपनशङ्करभट्टाचार्यः। कलिकाता : संस्कृत पुस्तक भाण्डार, २०११।

भट्टोजिदीक्षितः। *प्रौढमनोरमा* (*रत्नप्रभो*पेता)। सम्पा. सभापतिः शर्मोपाध्यायः। वाराणसी : वाणीविलास प्रकाशनम्, १९९७।

_______। *वैयाकरणसिद्धान्तकौमुदी* (कारकविभक्तिप्रकरणम्)। सम्पा. अयोध्यानाथसान्यालः शास्त्री। कलिकाता : संस्कृत पुस्तक भाण्डार, १४१८।

________। *वैयाकरणसिद्धान्तकौमुदी* (*श्रीधरमुखोल्लासिनीटी*कोपेता)। सम्पा. लक्ष्मीशर्मा। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१६।

________। *वैयाकरणिसातकौमुदी-२* (*बालमनोरमातत्त्वबोधिनीटी*कोपेता)। सम्पा . गिरिधरः शर्मा, परमेश्वरानन्दः शर्मा। वाराणसी : मोतीलाल बनारसीदास, २००४ (पुनर्मुद्रणम्; १९६१ प्रथमसंस्करणम्)।

________। *वैयाकरणिसातकौमुदी-३* (*बालमनोरमातत्त्वबोधिनीटी*कोपेता)। सम्पा . गिरिधरः शर्मा, परमेश्वरानन्दः शर्मा। वाराणसी : मोतीलाल बनारसीदास, २००४ (पुनर्मुद्रणम्; १९६१ प्रथमसंस्करणम्)।

________। *वैयाकरणिसातकौमुदी-४* (*बालमनोरमातत्त्वबोधिनीटी*कोपेता)। सम्पा . गिरिधरः शर्मा, परमेश्वरानन्दः शर्मा। वाराणसी : मोतीलाल बनारसीदास, २००४ (पुनर्मुद्रणम्; १९६१ प्रथमसंस्करणम्)।

_______।*वैयाकरणसिद्धान्तकौमुदी-१* (*बालमनोरमातत्त्वबोधिनीटी*कोपेता)। सम्पा . गिरिधरः शर्मा, परमेश्वरानन्दः शर्मा। वाराणसी : मोतीलाल बनारसीदास, २००४ (पुनर्मुद्रणम्; १९६१ प्रथमसंस्करणम्)।

भर्तृहरिः। *वाक्यपदीयम्* (*प्रतिभा*हिन्दीव्याख्योपेतम्)। सम्पा. सत्यनारायणः खण्डुडी। वाराणसी : चौखम्बा कृष्णदास अकादमी, २०१४।

रामकृष्णमाचार्यः। *भूषणसारतत्त्वप्रकाशिका।* सम्पा. हरेकृष्णः शतपथी। तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम्, २०१०।

राममनोहरमिश्रः। *भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा।* वाराणसी : सम्पूर्णानन्द-संस्कृत -विश्वविद्यालयः, १९८३।

वामनजयादित्यौ। *काशिका* (*भावबोधिनी* हिन्दीव्याख्योपेता च)। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : तारा प्रिंटिंग वर्क्स, १९८५।

Bhate, Saroja. *Pāṇini*. Delhi : Sahitya Academy, 2002.

Cardona, George. *Pāṇini and His Works and Its Traditions*. Delhi : Motilal Banarasidas, 1997.

Halder, Gurupada. *Vyākaraṇ(a) Darśaner(a) Itihās(a).* Kolkata : Sanskrit Book Depot, 2006 (rpt.;1st ed. 1340 BS).

*New Catalogus Catalogorum (Vol. 10)*. Ed. Dr. K. Kunjunni Raja. Madras : University of Madras, 1978.

Patañjali. *Vyākaraṇa-Mahābhāṣya.* Ed. F. Kielhorn. Bombay : Government Central Book Depot, 1st ed. 1880

Vasu, Srisa Chandra, *The Astādhyāī of Pānini* (Vol-1&2), Delhi: Motilal Banarasidass, 2009.